# ॥ वाल्मीकि रामायण॥

## २ अयोध्याकाण्ड

### अध्याय ८९

अथ शैलाद्विनिष्क्रम्य मैथिलीं कोसलेश्वरः ।
अदर्शयच्छुभजलां रम्यां मन्दाकिनीं नदीम् ॥ १॥

अब्रवीच्च वरारोहां चारुचन्द्रनिभाननाम् ।
विदेहराजस्य सुतां रामो राजीवलोचनः ॥ २॥

विचित्रपुलिनां रम्यां हंससारससेविताम् ।
कुसुमैरुपसम्पन्नां पश्य मन्दाकिनीं नदीम् ॥ ३॥

नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः ।
राजन्तीं राजराजस्य नलिनीमिव सर्वतः ॥ ४॥

मृगयूथनिपीतानि कलुषाम्भांसि साम्प्रतम् ।
तीर्थानि रमणीयानि रतिं सञ्जनयन्ति मे ॥ ५॥

जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥ ६॥

आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।
एतेऽपरे विशालाक्षि मुनयः संशितव्रताः ॥ ७॥

मारुतोद्धूत शिखरैः प्रनृत्त इव पर्वतः ।
पादपैः पत्रपुष्पाणि सृजद्भिरभितो नदीम् ॥ ८॥

कच्चिन्मणिनिकाशोदां कच्चित्पुलिनशालिनीम् ।
कच्चित्सिद्धजनाकीर्णां पश्य मन्दाकिनीं नदीम् ॥ ९॥

निर्धूतान्वायुना पश्य विततान्पुष्पसञ्चयान् ।
पोप्लूयमानानपरान्पश्य त्वं जलमध्यगान् ॥ १०॥

तांश्चातिवल्गु वचसो रथाङ्गाह्वयना द्विजाः ।
अधिरोहन्ति कल्याणि निष्कूजन्तः शुभा गिरः ॥ ११॥

दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये च तव दर्शनात् ॥ १२॥

विधूतकलुषैः सिद्धैस्तपोदमशमान्वितैः ।
नित्यविक्षोभित जलां विहाहस्व मया सह ॥ १३॥

सखीवच्च विगाहस्व सीते मन्दकिनीमिमाम् ।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ॥ १४॥

त्वं पौरजनवद्व्यालानयोध्याम् इव पर्वतम् ।
मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ॥ १५॥

लक्ष्मणश्चैव धर्मात्मा मन्निदेशे व्यवस्थितः ।
त्वं चानुकूला वैदेहि प्रीतिं जनयथो मम ॥ १६॥

उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः ।
नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह ॥ १७॥

इमां हि रम्यां गजयूथलोलितां
निपीततोयां गजसिंहवानरैः ।
सुपुष्पितैः पुष्पधरैरलङ्कृतां
न सोऽस्ति यः स्यान्न गतक्रमः सुखी ॥ १८॥

इतीव रामो बहुसङ्गतं वचः
प्रिया सहायः सरितं प्रति ब्रुवन् ।
चचार रम्यं नयनाञ्जनप्रभं
स चित्रकूटं रघुवंशवर्धनः ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com